# तृतीयः पाठः सूक्तिसुधा।

(कण्ठस्थीकरणार्थम्)
केवलं पङ्क्तिद्वयात्मकाः श्लोकाः

सूक्तयः नाम सुवचनानि । सूक्तीनां पठनेन वाक्चातुर्यं वर्धते । सूक्तीनां प्रयोगः लेखने भाषणे च प्रभावं जनयति । उक्तमेव–

खिन्नं चापि सुभाषितेन रमते स्वीयं मनः सर्वदा
श्रुत्वान्यस्य सुभाषितं खलु मनः श्रोतुं पुनर्वाञ्छति ।
अज्ञान् ज्ञानवतोऽप्यनेन हि वशीकर्तुं समर्थो भवेत्
**कर्तव्यो हि सुभाषितस्य मनुजैरावश्यकः सङ्ग्रहः ।।**

**वृत्तम्– शार्दूलविक्रीडितम्**

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं **विद्याविहीनः पशुः**।।१।। –नीतिशतकात्

सन्धिविग्रहाः – १) रूपमधिकम् = रूपम् + अधिकम् । २) बन्धुजनो विदेशगमने = बन्धुजनः + विदेशगमने ।

अन्वयः – विद्या नाम नरस्य अधिकं रूपम्, प्रच्छन्नगुप्तं धनम्, विद्या भोगकरी यशःसुखकरी (च) । विद्या गुरूणां गुरुः । विदेशगमने विद्या बन्धुजनः । विद्या परं दैवतम् । विद्या राजसु पूज्यते न तु धनम्। विद्याविहीनः पशुः (एव) ।

**वृत्तम्– वसन्ततिलका**

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
**न्याय्यात्पथः प्रविचलन्ति पदं न धीराः**।।२।। –नीतिशतकात्

सन्धिविग्रहाः – १) नीतिनिपुणा यदि = नीतिनिपुणाः + यदि २) अद्यैव = अद्य + एव ।
३) मरणमस्तु = मरणम् + अस्तु । ४) न्याय्यात्पथः = न्याय्यात् + पथः ।

अन्वयः – यदि (अपि) नीतिनिपुणाः निन्दन्तु स्तुवन्तु वा, लक्ष्मीः समाविशतु यथेष्टं गच्छतु वा, मरणम् अद्य एव अस्तु युगान्तरे वा, (तथापि) धीराः न्याय्यात् पथः पदं न प्रविचलन्ति ।

**वृत्तम्– अनुष्टुप्**

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः।
बकास्तत्र न बध्यन्ते **मौनं सर्वार्थसाधनम्**।।३।। –पञ्चतन्त्रात्

सन्धिविग्रहाः – १) आत्मनो मुखदोषेण = आत्मनः + मुखदोषेण । २) बकास्तत्र = बकाः + तत्र।

अन्वयः – शुकसारिकाः आत्मनः मुखदोषेण बध्यन्ते । तत्र बकाः न बध्यन्ते । (अतः) मौनं सर्वार्थसाधनम् ।

**वृत्तम्–अनुष्टुप्**

अल्पानामपि वस्तूनां **संहतिः कार्यसाधिका**।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।।४।। – हितोपदेशात्

सन्धिविग्रहाः – १) अल्पानामपि = अल्पानाम् + अपि ।
२) तृणैर्गुणत्वमापन्नैर्बध्यन्ते = तृणैः + गुणत्वम् + आपन्नैः + बध्यन्ते ।

अन्वयः – अल्पानां वस्तूनाम् अपि संहतिः कार्यसाधिका (विद्यते) । (यथा) गुणत्वम् आपन्नैः तृणैः मत्तदन्तिनः बध्यन्ते ।

वृत्तम्–अनुष्टुप्

घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम् ।
**येन केन प्रकारेण** प्रसिद्धः पुरुषो भवेत् ।।५।। –हास्योक्तिः

सन्धिविग्रहाः – १) कुर्याद्रासभरोहणम् = कुर्यात् + रासभरोहणम् । २) पुरुषो भवेत् = पुरुषः + भवेत् ।

अन्वयः – पुरुषः घटं भिन्द्यात्, पटं छिन्द्यात्, रासभरोहणं (अपि) कुर्यात् । येन केन प्रकारेण (सः) प्रसिद्धः भवेत् ।

## भाषाभ्यासः

### श्लोकः १

**१. पूर्णवाक्येन उत्तरत।**

अ) का गुरूणां गुरुः ?

आ) किं राजसु न पूज्यते ? इ) कः पशुः एव ?

**२. माध्यमभाषया उत्तरत ।**

अ) 'विद्या नाम नरस्य'... इति श्लोकाधारेण विद्यायाः महत्त्वं लिखत ।

**३. जालरेखाचित्रं पूरयत ।**

विद्या →
- प्रच्छन्नगुप्तं ________ ।
- गुरूणां ________ ।
- परं ________ ।
- नरस्य अधिकं ________ ।

### श्लोकः २.

**१. मञ्जूषातः उचितं शब्दं चित्वा तालिकां पूरयत ।**

| | | | |
|---|---|---|---|
| नीतिनिपुणाः | ________ | ________ | वा |
| ________ | समाविशतु | ________ | वा |
| ________ | अद्यैव | ________ | वा |

(निन्दन्तु, गच्छतु, युगान्तरे, मरणम्, लक्ष्मीः, स्तुवन्तु ।)

**२. सन्धिविग्रहं कुरुत ।**

अ) मरणमस्तु । आ) अद्यैव ।

**३. माध्यमभाषया उत्तरत ।**

'न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।' इति सूक्तिं स्पष्टीकुरुत।

### श्लोकः ३.

**१. पूर्णवाक्येन उत्तरत ।**

अ) शुकसारिकाः केन बध्यन्ते ?

आ) के न बध्यन्ते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) बकास्तत्र

आ) आत्मनो मुखदोषेण

### श्लोकः ४.

**१. पूर्णवाक्येन उत्तरत ।**

अ) का कार्यसाधिका भवति ?

आ) कैः मत्तदन्तिनः बध्यन्ते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) अल्पानामपि

आ) तृणैर्गुणत्वमापन्नैर्बध्यन्ते

**३. माध्यमभाषया उत्तरत ।**

'संहतिः कार्यसाधिका' इति सूक्तिं स्पष्टीकुरुत ।

### श्लोकः ५.

**१. एकवाक्येन उत्तरत।**

अ) नरः किं छिन्द्यात् ?

आ) मनुजः किं भिन्द्यात् ?

**२. श्लोकात् लिङ्लकारस्य रूपाणि चित्वा लिखत ।**

**३. माध्यमभाषया उत्तरत ।**

'येन केन प्रकारेण' इति उक्तिं स्पष्टीकुरुत ।

**१. समानार्थकशब्दान् लिखत ।**

विद्या, पशुः, धनम्, लक्ष्मीः, शुकः, संहतिः, दन्ती, पटम्, रासभः ।

**२. विरुद्धार्थकशब्दान् लिखत ।**

विदेशः, प्रच्छन्नम्, निन्दन्तु, रोहणम् ।

7L17HX

## अभ्यासपत्रम् १ (१, २, ३ पाठानाम् आधारेण)

### १. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।

अ) स्तवनं तु मानवस्यैव भवेत् ।
आ) पृथुराजः प्रजाहितदक्षः नृपः ।
इ) अकस्मात् आगन्तुना सह मैत्री युक्ता ।
ई) क्षेत्रपतिः मृगं बन्धनात् व्यमुञ्चत् ।

### २. उचितं पर्यायं चित्वा लिखत ।

अ) शृगालः स्वार्थहेतुना ________ सह मैत्रम् ऐच्छत् । (मृगेण/काकेन)
आ) फलितं मे ________ । (प्रयोजनम्/मनोरथम्)
इ) ________ बीजेभ्यः अङ्कुराः उद्भूताः । (पर्जन्यानन्तरं/शीतकालानन्तरं)
ई) प्रजाः अतीव ________ आसन् । (कृशाः/सुदृढाः)

### ३. लकारं लिखत ।

अ) सर्वं वस्तुजातं वसुन्धरायाः उदर एव वर्तते ।
आ) अहं प्रसन्ना भविष्यामि ।
इ) वयं सर्वे आनन्देन एकत्र वसामः ।
ई) पादान्स्तब्धीकृत्य तिष्ठ ।
उ) लक्ष्मीः समाविशतु गच्छतु वा ।

### ४. विग्रहवाक्याणां समासनामभिः मेलनं कुरुत ।

| समासविग्रहः | समासनाम |
|---|---|
| १. चिन्तया आकुलः | षष्ठी-तत्पुरुषः |
| २. धनं च धान्यानि च पुष्पाणि च फलानि च | पञ्चमी-तत्पुरुषः |
| ३. चोरलुण्ठकेभ्यः भयम् | इतरेतरद्वन्द्वः |
| ४. प्रजाहिते दक्षः | तृतीया-तत्पुरुषः |
| ५. जलस्य व्यवस्थापनम् | कर्मधारयः |
| ६. प्रयागं नाम क्षेत्रम् | सप्तमी-तत्पुरुषः |

| समासविग्रहः | समासनाम |
|---|---|
| १. मृगः च शृगालः च | सप्तमी-तत्पुरुषः |
| २. क्षुद्रा बुद्धिः यस्य सः | कर्मधारयः |
| ३. विद्यया विहीनः | अव्ययीभावः |
| ४. नीत्यां निपुणाः | तृतीया-तत्पुरुषः |
| ५. अहनि अहनि | बहुव्रीहिः |
| ६. विविधानि बीजानि | इतरेतरद्वन्द्वः |

| समासविग्रहः | समासनाम |
|---|---|
| १. न परिचितः | षष्ठी-तत्पुरुषः |
| २. लगुडं हस्ते यस्य सः | बहुव्रीहिः |
| ३. शुकाः च सारिकाः च | इतरेतरद्वन्द्वः |
| ४. क्षेत्राणां पतिः | नञ्-तत्पुरुषः |
| | |

### ५. योग्यं क्रियापदं चित्वा वाक्यं पुनर्लिखत ।

अ) त्वं धनुः ______ । (त्यज/त्यजतु)
आ) त्वं प्रयत्नेन कृषिकार्यं ______ । (करोति/करोषि)
इ) त्वमात्मानं मृतवत् ______ । (सन्दर्शय/सन्दर्शयतु)
ई) भवान् अपि अपरिचितः एव ______ । (आसीः/आसीत्)

### ६. योग्यं वाच्यपर्यायं चिनुत ।

अ) पृथुभूपेन धनुः सज्जीकृतम् । (कर्तृवाच्यम्/कर्मवाच्यम्)

आ) क्षेत्रपतिना पाशः योजितः । (कर्तृवाच्यम्/कर्मवाच्यम्)

इ) अहं शब्दं करोमि । (कर्तृवाच्यम्/कर्मवाच्यम्)

ई) धीराः न्याय्यात्पथः पदं न प्रविचलन्ति । (कर्तृवाच्यम्/कर्मवाच्यम्)

### ७. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

अ) पृथुवैन्यः स्वप्रजाः दृष्ट्वा चिन्ताकुलः जातः यतः ____________________ ।
१. तस्य प्रजाजनाः परस्परं वादविवादं कुर्वन्ति ।
२. तस्य प्रजाजनाः पशुवत् जीवन्ति ।

आ) भूम्या धनधान्यपुष्पफलानि स्व-उदरे निहितानि यतः ____________________ ।
१. वेनभूपः दुःशासकः आसीत् ।
२. भूमिः स्वभावेन कृपणा आसीत् ।

इ) पृथुभूपेन स्वधनुः सज्जीकृतम् यतः ____________________ ।
१. सः शत्रुं हन्तुम् इच्छति स्म ।
२. सः धनधान्यादि सर्वं वस्तुजातं वसुन्धरायाः प्राप्तुम् इच्छति स्म ।

ई) पृथुभूपस्य प्रजाजनाः सन्तुष्टाः अभवन् यतः ____________________ ।
१. ते प्रभूतं धान्यम् अलभन्त ।
२. ते प्रभूतं सुवर्णम् अलभन्त ।

उ) शृगालः मृगेण सह सख्यम् इच्छति यतः ____________________ ।
१. शृगालः मृगमांसं खादितुम् इच्छति ।
२. शृगालः मृगे स्निह्यति ।

ऊ) जम्बूकः मनसि आनन्दितः यतः ____________________ ।
१. मृगः पाशैः बद्धः ।
२. जम्बूकस्य अन्येन सह मित्रता अभवत् ।

ए) क्षेत्रपतिः मृगं बन्धनात् व्यमुञ्चत् यतः ____________________ ।
१. सः 'मृगः मृतः' इति चिन्तितवान् ।
२. पाशबद्धं मृगं दृष्ट्वा तस्य हृदयं करुणया अद्रवत् ।

**क्रीडत-नन्दत ।**

**अनन्त्यवाक्यरचना**

प्रथमः बालः एकस्य शब्दस्य कथनेन कस्यचित् वाक्यस्य आरम्भं कुर्यात् । द्वितीयः बालः प्रथमेन बालकेन उक्तं शब्दम् उच्चार्य तस्य वाक्यस्य अनुवर्तनरूपेण स्वयमपि एकं शब्दं योजयेत् । तृतीयः तृतीयम् । चतुर्थः चतुर्थम् एवम् अग्रेऽपि । परन्तु कोऽपि वाक्यस्य समाप्तिं न कुर्यात् । यः तथा करोति सः गणात् बाह्यः भवति ।
उदा. - - - १. कस्मिंश्चित् - - - २. कस्मिंश्चित् ग्रामे - - - ३. कस्मिंश्चित् ग्रामे कश्चन - - - ४. कस्मिंश्चित् ग्रामे कश्चन कृपणः - - -
अत्र 'आसीत्' इति यदि उच्यते तर्हि वाक्यं समाप्तं भवति । यः तत् कथयति सः बाह्यः भवति। अतः सः केनापि प्रकारेण वाक्यम् अग्रेऽपि अनुवर्तयितुं प्रयत्नं कुर्यात् शिक्षकः किञ्चित् साहाय्यं कर्तुम् अर्हति ।

**- क्रीडावल्ली-पुस्तकात् ।**